क्रोशसह ऋजुः । व्यूहतत्त्वविधानज्ञः फल्गुसारविशेषवित् । राज्ञा सेनापतिः कार्य्यो ब्राह्मणः क्षत्रियोऽथ वा” मत्स्यपु० १८९ अ० ।

**सेनामुख** न० ६त० । १सैन्याग्रे संख्याविशेषयुते हस्त्यश्वादौ हस्तिनः त्रयः रथाः त्रयः अश्वा नव पत्तादयः पञ्चदश एतत्समुदाये अमरः । [भिके सैन्ये अमरः ।

**सेनारक्ष** पु० सेनां रक्षति रक्ष–अण् । सेनारक्षाकारके याद०।

**सेफ** पु० सि–फ । शेफे पुंसोऽसाधारणचिह्ने जटा० ।

**सेमन्ती** स्त्री सिम–झि गौ० ङीष् । (सेयाँती) पुष्पभेदे ।

**सेर** पु० “पादोनगद्याणकतुल्यटङ्कैर्द्विसप्त७२तुल्यैः कथितोऽत्र सेरः । मणाभिधानं खयुगैः४०श्च सेरैर्धान्यादितौल्येषु तुरुष्कसंज्ञः १ । १द्रङ्केन्दु १८२ । मङ्कैर्धटकैश्च सेरस्तैः पञ्चभिः स्याद्धटिका च ताभिः । मणोऽष्टभिस्त्वालमगीरशाहकृताऽत्र संज्ञा निजराजधान्याम्” लीला० उक्ते मानभेदे ।

**सेराह** पुंस्त्री० । श्वेताश्वे हेमच० स्त्रियां ङीष् ।

**सेरु** त्रि० सि–बन्धने रु । बन्धनकर्त्तरि व्या० ।

**सेलु** पु० सि–लु । श्लेष्मातकवृक्षे त्रिकाण्डशे० ।

**सेव** न० सेव–कर्मणि घञर्थे क । सेविफले (सेओ) राजनि०

**सेवक** पु० सीव्यति सिव–ण्वुल् । १सीवनकर्त्तरि (दरजी) सेव–ण्वुल् । २भृत्ये ३दासे ४अनुचरे च त्रि० मेदि० ।

**सेवकालु** पु० सेवं सेविफलमिव कायति कै–क कर्म० । निशाभङ्गावृक्षे (दुग्धपेया) शब्दच० । [निधौ भरतः ।

**सेवधि** पु० सेवं सेवनं दधाति धा–कि । शङ्खप्रभृतौ

**सेवन** न० सिव–सेव–वा ल्युट् । १सूच्यादिना वस्त्रादेर्योजने अमरः । २आश्रयणे ३उपभोगे ४बन्धने ५पूजने ६भजने च मेदि० । सीव्यतेऽनया ल्युट् । ७सूच्यां स्त्री ङीप् हेमच० ।

**सेवा** स्त्री सेव–अ । १भजने २आराधने ३उपभोगे ४आश्रयणे च । सेवापराधाश्च अपराधशब्दे २२३ पृ० दर्शिताः वाराहेत्वन्यथोक्ता यथा “कर्मणा मनसा वाचा ये पापकर्माणो जनाः । भक्षणं दन्तकाष्ठस्य राजान्नस्य तु भोजनम् । मैथुनं शवसंस्पर्शः पुरीषोत्सर्ग एव च । सूतक्युदक्यास्पर्शं स्पर्शनं मोहनं तथा । अभाष्यभाषणं कोपं पिण्याकस्य च भक्षणम् । रक्तपारक्यमलिननीलजाम्बरधारणम् । गुरोश्चालीकनिर्बन्धः पतितान्नस्य भक्षणम् । अभक्ष्यभक्षणञ्चैव तण्डुलीयविभीतकम् । व्याघ्रानं तु वराहस्य जालपादवराकयोः । भक्षणं देवतागारे सोपानत्कोपसर्पणम् । तथैव देवपूजायां निषिद्धकुसुमार्चनम् । अनुत्तार्य्य च निर्माल्यं पूजा जीर्णान्धकारयोः । पानं सुराया देवस्य अन्धकारे प्रबोधनम् । वातकर्माचंने विष्णोरनमस्करणं तथा । अपराधास्त्वयस्त्रिंशत् समाख्याता मया धरे! । एभिर्युक्तस्तु पुरुषो विष्णुं नैव प्रपद्यते । दूरस्थो न नमस्कारं कुर्य्यात् पूजा तु राक्षसी” ।

**सेवि** न० सेव–कर्मणि इन् । फलभेदे (सेओ) राजनि० ।

**सेविका** स्त्री पक्वान्नभेदे कृतान्नशब्दे २१२१ पृ० दृश्यम् ।

**सेवित** त्रि० सेव–क्त । १आराधिते शब्दर० । २आश्रिते ४उपयुक्ते च ५सेविफले न० राजनि० ।

**सेव्य** न० सेव–ण्यत् । १वीरणमूले अमरः । २अश्वत्थे पु० राजनि० । ३हिज्जलवृक्षे पु० शब्दर० । ४सेवार्हे त्रि० । ५वन्दाकवृक्षे स्त्री हेमच० । [राजनि० ।

**सैंहली** स्त्री सिंहले देशे भवा अण् ङीप् । सिंहपिप्पल्याम्

**सैंहिक** पु० सिंहिकायां भवः ठक् । १राहौ शब्दर० । तस्याः अपत्यम् ढक् । सैंहिकेयोऽप्यत्र अमरः ।

**सैकत** न० सिकताः सन्त्यत्र अण् । बालुकाप्रचुरे नद्यादितटे अमरः । २सिकताप्रचरदेशे त्रि० राजनि० ।

**सैकतिक** पु० सह एकतया सैकतं तदस्यास्ति ठन् । १संन्यस्ते २क्षपणके ३सन्देहजीविनि त्रि० मेदि० । ४मातृयात्रायां ५मङ्गलसूत्रके न० मेदि० । [२सैकतप्रिये त्रि० ।

**सैकतेष्ट** न० सैकतं स्थानमिष्टं यस्य । १आर्द्रके राजनि० ।

**सैतवाहिनी** स्त्री सितायाः शर्करायाः अयम् अण् सैतो मधुररसस्तं वहति वह–णिनि । बाहुदायां नद्याम् अमरः ।

**सैद्धान्तिक** पु० सिद्धान्तं वेत्ति सिद्धान्त+ठक् । सिद्धान्ताभिज्ञे हेमच० । [२तत्कर्मणि च “सैनापत्यमुपेत्य यः” कुमारः ।

**सैनापत्य** न० सेनापतेर्भावः कर्म वा ष्यञ् । १सेनापतिधर्मे,

**सैनिक** पु० सेनायां समवैति ठक् । १मिलिते हस्त्यश्वादौ अमरः । प्राणिवधनियुक्ते भाग०५।६६अ० ति०त०रघु० । वस्तुतस्तु सौनिका इव श्वधितिनेत्येव तत्र पाठः साधुः ३सेनासम्बन्धिनि त्रि० ।

**सैन्धव** न० सिन्धुनदीसमीपे देशे भवम् अण् । १लवणभेदे अमरः “सैन्धवं लवणं स्वादु दीपनं पाचनं लघु । स्निग्धं रुच्यं हिमं वृष्यं सूक्ष्मं नेत्र्यं त्रिदोषहृत” भावप्र० । सिन्धोरदूरभवः अण् । २घोटकभेदे पुंस्त्री० अमरः तस्य समुद्रसमीपस्थसिन्धुदेशस्यारब्यदेशादूरत्वात् तथात्वम् । स्त्रियां ङीष् ।